Sadvidya Journal of Sanskrit and Indian Knowledge Systems
DOI: 10.18311/sadvid/2024/49650

फलव्याप्यत्वरूपदृश्यत्वहेतोः लघुचन्द्रिकानुसारेण विमर्शः

Karthik Sharma K

Research Scholar, Sree Sankara College, Kalady (Research Centre of MG University) &
Assistant Professor at Chinmaya Vishwavidyapeeth, Onakkoor, Ernakulam – 686667, Kerala
krishnankaviyappilly@gmail.com, karthiksharma.k@cvv.ac.in

1. सारांशः

अद्वैतसिद्धौ आदौ विप्रतिपत्तेः विचाराङ्गत्वं व्यवस्थाप्य मिथ्यात्वानुमानविचारः प्रवर्तितः अस्ति । तत्प्रसङ्गे सामान्यानुमानं विशेषानुमानञ्च प्रदर्शितम् । तदुत्तरं अनुमाने यत् मिथ्यात्वरूपं साध्यं वर्तते तस्य पञ्च लक्षणानि सविस्तरं निरूपितानि । तदुत्तरञ्च दृश्यत्वं जडत्वम् अंशित्वम् इत्यादयः मिथ्यात्वसाधकाः हेतवः क्रमेण निरूपिताः । दृश्यत्वहेतुनिरूपणावसरे पूर्वपक्षिणा कृतेषु षट् विकल्पेषु फलव्याप्यत्वम् इति यः पक्षः वर्तते, सः पक्षः सिद्धान्तेऽपि नाङ्गीकृतः अद्वैतसिद्धिकारैः । तस्मिन् च पक्षे भागासिद्धिः साधनवैकल्यम् इति दोषद्वयम् उक्तम् अद्वैतसिद्धिकारैः । मया अस्मिन् शोधप्रबन्धे लघुचन्द्रिकानुसारेण अस्य दोषद्वयस्य विमर्शः क्रियते ।

2. उपोद्घातः

"ननु मिथ्यात्वे साध्ये हुतूकृतं यत् दृश्यत्वं तदप्युपपादनीयम् । तथा हि किमिदं दृश्यत्वं? वृत्तिव्याप्यत्वं वा फलव्याप्यत्वं वा साधारणं वा कदाचित् कथञ्चित् चिद्विषयत्वं वा स्वव्यवहारे स्वातिरिक्तसंविदपेक्षानियतिर्वा अस्वप्रकाशत्वं वा"[1] इति षट् विकल्पाः प्रदर्शिताः पूर्वपक्षग्रन्थे अद्वैतसिद्धौ । तद्व्याख्यानावसरे लघुचन्द्रिकाकारैः एकैकस्य विकल्पस्य स्वरूपं सम्यक् परिष्कृत्य दोषाः प्रदर्शिताः । तत्र द्वितीयविकल्पं विहाय अन्ये सर्वेऽपि विकल्पाः अङ्गीकृताः सिद्धिकारैः । तदुक्तम् अद्वैतसिद्धौ; "फलव्याप्यत्वव्यतिरिक्तस्य सर्वस्याऽपि पक्षस्य क्षोदक्षमत्वात्"[2] इति । अस्मिन् च पक्षे भागासिद्धिः साधनवैकल्यम् इति दोषद्वयम् अपरिहार्यम् इति कृत्वा अयं पक्षः परित्यक्तः । अस्मिन् शोधप्रबन्धे सम्बन्धार्था वृत्तिः इति मते फलव्याप्यत्वस्वरूपं किम्? आवरणाभिभवार्था वृत्तिः इति मते फलव्याप्यत्वम् किम्? एतत्पक्षद्वये अपि पूर्वोक्तदोषद्वयं भवति वा? इदं दोषद्वयं परिहर्तुं शक्यते वा इत्यादिकं विचार्यते । तत्र च आदौ पक्षभेदेन फलव्याप्यत्वस्वरूपं परीक्ष्यते ।

3. पक्षभेदेन फलव्याप्यत्वस्वरूपम्

'फलव्याप्यत्वं वा' इति पूर्वपक्षिणा प्रदर्शितः द्वितीयः विकल्पः । सम्बन्धार्था वृत्तिः इति मते फलशब्दस्य स्वाकारवृत्तिप्रतिबिम्बितचैतन्यम् । व्याप्यत्वञ्च तादात्म्यम् । तथा च स्वाकारवृत्तिप्रतिबिम्बितचैतन्यतादात्म्यं फलव्याप्यत्वम् ।

प्रत्यक्षस्थले घटादौ बहिर्गतघटादिविषयकवृत्तिप्रतिबिम्बितविषयचैतन्याभिन्नप्रमातृचैतन्यविषयत्वम् अस्ति । अयमाशयः ; घटाकारमनोवृत्तिः स्वोपादानेन मनसा सह घटदेशं प्रति गच्छति इत्यतः घटतदाकारवृत्त्यन्तःकरणानां त्रयाणाम् उपाधीनाम् एकदेशस्थत्वमस्तीति कृत्वा घटावच्छिन्नचैतन्यस्य घटाकारवृत्त्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्यस्य च परस्परम् अभेदः अस्ति । घटाकारवृत्त्यवच्छिन्नचैतन्यमेव घटाकारवृत्तिप्रतिप्रतिबिम्बितचैतन्यम् । एवञ्च एतावत् पर्यन्तं घटावच्छिन्नचैतन्ये अध्यस्तः घटः इदानीं घटाकारवृत्त्यवच्छिन्नचैतन्याभिन्नप्रमातृचैतन्ये तादाम्येन अध्यस्तः । तस्मात् घटाकारवृत्तिप्रतिबिम्बितं यत् विषयचैतन्याभिन्नं प्रमातृचैतन्यं तद्विषयत्वरूपं फलव्याप्यत्वम् अपरोक्षे घटादौ आयाति ।

परोक्षस्थले तु वह्न्याकारानुमितिरूपवृत्तिः न वह्निदेशं प्रति गच्छति किन्तु स्वस्थाने एव तिष्ठति । तथा च स्वस्थानमात्रस्थिता याः वह्न्याकाराऽन्तःकरणवृत्तिः, तत्प्रतिबिम्बितं यत् प्रमातृचैतन्यं तद्विषयत्वं परोक्षे वह्न्यादौ वर्तते ।

प्रातिभासिके स्वाप्नगजादौ गजाद्याकाराविद्यावृत्तिप्रतिबिम्बितसाक्षिचैतन्यरूपप्रमातृविषयत्वम् अस्ति इति फलव्याप्यत्वसद्भावः । एवमेव प्रातिभासिके शुक्तिरजतादौ अपि फलव्याप्यत्वसमन्वयः भवति ; इदमवच्छिन्नचैतन्ये विद्यमानम् अज्ञानं रजताकारेण परिणमते । तथा च

*Author for correspondence

Article Received on: 15.10.2024 *Peer-reviewed* Accepted on: 06.12.2024

प्रातिभासिकरजताकाराविद्यावृत्तिः इदमवच्छिन्नचैतन्ये उत्पद्यते इत्याशयः । (एवञ्च सति अविद्यावृत्त्यवच्छिन्नचैतन्यस्य इदमवच्छिन्नचैतन्यस्य च अभेदः अस्त्येव)इदमाकारवृत्तिश्च अन्तःकरणपरिणामरूपा बहिः स्वोपादानेन अन्तःकरणेन सह इदंपदार्थदेशं प्रति गच्छति । तथा इदंपदार्थस्य इदमाकारवृत्तेः अन्तःकरणस्य च एकदेशस्थत्वात् त्रयाणां चैतन्यानाम् अभेदः एव । एवञ्च रजताकाराविद्यावृत्तौ प्रमातृचैतन्यस्य प्रतिबिम्बः भवति, तद्विषयत्वञ्च प्रातिभासिके रजते वर्तते ।

एवञ्च अपरोक्षघटादौ, अनुमेयवह्न्यादौ, स्वाप्नगजादौ, शुक्तिरूप्यादौ च फलव्याप्यत्वसद्भावात् न कुत्राऽपि भागासिद्धिप्रसङ्गः ।

आवरणाभिभवार्था वृत्तिः इति मते तु फलशब्दस्य भग्नावरणकचैतन्यं अर्थः । व्याप्यत्वञ्च तादात्म्यम् एव । तथा च एतन्मते भग्नावरणकचित्तादात्म्यं फलव्याप्यत्वम् । अज्ञानावरणं हि द्विविधम् ; 'नास्ति' इति व्यवहारप्रयोजकम् असत्त्वापादकम् आवरणम् । अपरञ्च 'न भाति' इति व्यवहारप्रयोजकम् अभानापादकम् आवरणम् । प्रत्यक्षस्थले घटविषयकवृत्तिः यदा घटदेशं प्रति गच्छति तदा घटावच्छिन्नचैतन्यस्य प्रमातृचैतन्यस्य च अभिन्नत्वं वर्तते । तदा तादृशघटाकारवृत्त्या 'घटो नास्ति इति व्यवहारप्रयोजकस्य असत्वापादकावरणस्य 'घटो न भाति' इति व्यवहारप्रयोजकस्य अभानापादकावरणस्य च नाशः भवति । तथा च भग्नावरणकं चित् भवति प्रकृते घटावच्छिन्नचैतन्याभिन्नप्रमातृचैतन्यं तत्तादात्म्यं घटे वर्तते इति घटस्य फलव्याप्यत्वम् ।

परोक्षस्थले तु वह्न्यादिविषयकवृत्तिः न वह्निदेशं प्रति गच्छति । तस्मात् विषयचैतन्यं प्रमाणप्रमातृचैतन्याभ्यां भिन्नम् एव । तथाऽपि अत्र विषयचैतन्ये विद्यमानस्य 'नास्ति' इति व्यवहारप्रयोजकस्य अज्ञानावरणस्य नाशः अस्त्येव । तथा च आवरणभङ्गविशिष्टं चैतन्यं वह्न्यवच्छिन्नचैतन्यं तद्विषयत्वं वह्न्यादौ अस्तीति न दोषः ।

तथा च सम्बन्धार्था वृत्तिः इति पक्षे स्वाकारवृत्तिप्रतिबिम्बितचैतन्यतादात्म्यं फलव्याप्यत्वम् । आवरणाभिभवार्था वृत्तिः इति मते भग्नावरणकचित्तादात्म्यं फलव्याप्यत्वम् इति पर्यवसितम् ।

4. द्वितीयविकल्पे पूर्वपक्षिणा प्रदर्शितः दोषः

"नाऽपि द्वितीयः ; नित्यातीन्द्रिये शुक्तिरूप्यादौ च तदभावेन भागासिद्धिसाधनवैकल्ययोः प्रसङ्गात्"[4] इत्यनेन भागासिद्धिः साधनवैकल्यम् इति दोषद्वयं प्रदर्शितम् । तथा हि अत्र नित्यातीन्द्रियम् इत्यनेन गुरुत्वादिकम् विवक्षितम् । घटादिना सह चक्षुस्सनिकर्षे सति घटादिविषयकप्रत्यक्षवृत्तिः भवति, सन्निकर्षाभावे च तन्न भवतीति कृत्वा घटादिकं कदाचिदेव इन्द्रियम् अतिक्रम्य तिष्ठति । गुरुत्वादिकं तु कदापि न प्रत्यक्षविषयः इति कृत्वा सर्वदा इन्द्रियम् अतिक्रम्य तिष्ठति । तस्मिन् च गुरुत्वादौ निरुक्तफलव्याप्यत्वयोः अभावात् भागासिद्धिः । गुरुत्वादिविषयकानुमितिरूपवृत्तेः बहिर्निगमनस्य अनङ्गीकारेण गुरुत्वस्य गुरुत्वाकारवृत्तेश्च एकदेशस्थत्वं नास्ति । उपाध्योः एकदेशस्थत्वे सति एककालीनत्वमेव उपधेयाभेदप्रयोजकम् । तथा च प्रकृते एकदेशस्थत्वाभावेन गुरुत्वावच्छिन्नचैतन्यस्य गुरुत्वाकारवृत्त्यवच्छिन्नचैतन्यस्य (गुरुत्वाकारवृत्तिप्रतिबिम्बितचैतन्यमेव गुरुत्वाकारवृत्त्यवच्छिन्नचैतन्यम्) च परस्परम् अभेदः न सम्भवति । तथा च गुरुत्वे गुरुत्वाकारवृत्तिप्रतिबिम्बितचैतन्यतादात्म्यं नास्तीति कृत्वा प्रथमं फलव्याप्यत्वं न सम्भवति ।

एवमेव भग्नावरणकचित्तादात्म्यं फलव्याप्यत्वम् इति पक्षे अपि गुरुत्वादौ भागासिद्धिः भवति । तथा हि अज्ञानस्य शक्तिद्वयं वर्तते आवरणशक्तिः विक्षेपशक्तिश्च । आवरणशक्तिश्च पुनः द्वेधा 'नास्ति' इति व्यवहारप्रयोजिका असत्त्वापादिका आवरणशक्तिः एका । 'न भाति; इति व्यवहारप्रयोजिका अभानापादिका आवरणशक्तिः अपरा । प्रत्यक्षस्थले तु घटादिवृत्त्या द्विविधायाः अपि आवरणशक्तेः नाशः भवत्येव । अनुमानजन्यवह्नियादिविषयकपरोक्षवृत्त्या तु असत्त्वापादकावरणशक्तेः एव नाशः न तु अभानापादकावरणशक्तेः अनुमानजन्यवह्नियादिविषयकपरोक्षवृत्तिसत्त्वेऽपि अपि 'वह्निः मे न भाति' इति व्यवहारस्य सद्भावात् । एवञ्च प्रकृते भग्नावरणकचित्तादात्म्यम् इत्यस्य तु आवरणशक्तिभङ्गविशिष्टचित्तादात्म्यम् इत्यर्थः विवक्षितः ; तत्र च आवरणशक्तिसामान्यभङ्गः विवक्षितो वा उत यत्किञ्चिदावरणशक्तिभङ्गमात्रं विवक्षितम् ? । आद्ये गुरुत्वादौ भागासिद्धिः भवति; तत्र अभानापादकावरणशक्तेः भङ्गस्य अभावात् । द्वितीये तु शुक्तिरूप्ये साधनवैकल्यं भवति । अयमाशयः; सिद्धान्ते प्रातिभासिके शुक्तिरूप्यादौ अज्ञानं नाङ्गीक्रियते । तथा च शुक्तिरूप्ये असत्त्वापादकावरणशक्तेः, अभानापादकावरणशक्तेश्च प्रसङ्ग एव नास्ति इति तद्भङ्गः अपि न सम्भवति । एवञ्च यत्किञ्चिद्भङ्गस्य अपि शुक्तिरूप्ये अभावात् तत्र साधनवैकल्यम् ।

न च "इदं रजतम्" इति भ्रमस्थले इदंत्वप्रकारकेदम्पदार्थविशेष्यकवृत्त्या शुक्त्यवच्छिन्नचैतन्ये विद्यमानम् इदम्पदार्थविषयकम् असत्त्वापादकम् अज्ञानम् अभानापादकञ्च अज्ञानं, तदुभयस्यापि नाशः वक्तव्यः ; तद्वृत्तिकाले "इदम्पदार्थो नास्ति", "इदम्पदार्थो मे न भाति" इति द्विविधस्याऽपि व्यवहारस्य अभावात् । एवञ्च आवरणभङ्गविशिष्टं चैतन्यम् अस्ति शुक्त्यवच्छिन्नचैतन्यं, तत्तादात्म्यं शुक्तिरूप्ये अस्तीति कृत्वा न साधनवैकल्यम् इति

वाच्यम् स्वावच्छिन्नाज्ञानविषयत्वभङ्गःविशिष्टचिद्विषयत्वमेव फलव्याप्यत्वं विवक्षितम्, तच्च वक्ष्यमाणरीत्या शुक्तिरूप्ये नास्तीति कृत्वा साधनवैकल्यं बोध्यम् । तथा हि प्रकृते यत्र फलव्याप्यत्वम् उपपादनीयं तत् स्वशब्देन ग्राह्यम् । तथा च स्वं - घटः । स्वावच्छिन्नाज्ञानविषयता - घटावच्छिन्नचैतन्यनिष्ठा अज्ञाननिरूपिताविषयता।तस्याःभङ्गःघटविषयकवृत्तिप्रयोज्यः । तादृशभङ्गःविशिष्टं चैतन्यम् घटावच्छिन्नचैतन्यं, तद्विषयत्वं घटे इति घटस्य फलव्याप्यत्वम् ।

न च 'स्वावच्छिन्नाज्ञानविषयत्वम्' इति किमर्थम् उच्यते 'स्वनिष्ठाज्ञानविषयत्वम्' इति कुतो नोच्यते इति वाच्यम् सिद्धान्ते तत्रैव आवरणं कल्पनीयं यत्र प्रकाशः प्रसक्तः; प्रकाशप्रतिबन्धार्थम् हि आवरणं कल्प्यते । तथा च घटादेः जडत्वात् स्वतः तस्य प्रकाशः नैव प्रसक्तः इति कृत्वा घटादौ आवरणं न कल्प्यते । घटस्य प्रकाशस्तु प्रकाशरूपचैतन्ये अध्यस्तत्वात् सम्भवति । तथा च अज्ञानविषयत्वं चैतन्ये एव कल्प्यते, घटादौ तु अज्ञानविषयतावच्छेदकत्वमात्रं कल्प्यते ।

न च अज्ञानविषयतावच्छेदकत्वमपि घटस्य माऽस्तु इति वाच्यम् तत्तजडावच्छिन्नाज्ञानविषयत्वभङ्गं प्रति तत्तदाकारवृत्तेः कारणत्वम् इति कार्यकारणभावः अङ्गीकर्तव्यः; अन्यथा घटादिविषयकवृत्त्या शुद्धचैतन्यविषयकमूलाज्ञाननिवृत्तिः स्यात् । तस्मात् जडस्य अज्ञानविषयतावच्छेदकत्वम् अङ्गीकर्तव्यमेव ।

न च जडस्य अज्ञानविषयत्वावच्छेदकत्वाङ्गीकारेऽपि फलव्याप्यत्वशरीरे तन्निवेशः (स्वावच्छिन्नत्वनिवेशः) माऽस्तु । तथा च अज्ञानविषयत्वभङ्गःविशिष्टचिद्विषयत्वम् फलव्याप्यत्वम् इत्येव साधु इति वाच्यम् तथा सति विषयान्तरावच्छिन्नाज्ञानविषयत्वभङ्गःविशिष्टचिद्विषयत्वस्य गुरुत्वादौ प्रत्यक्षपर्वतनिष्ठवह्न्यादौ च सत्त्वात् गुरुत्वादेः फलव्याप्यत्वापत्तेः । अयमाशयः ; चक्षुरिन्द्रियजन्यघटवृत्तिरूपाकारवृत्तिदशायाम् घटावच्छिन्नचैतन्याभिन्नरूपावच्छिन्नचैतन्ये विद्यमाननस्य "घटरूपं नास्ति इति" व्यवहारप्रयोजकस्य असत्त्वापादकाज्ञानस्य "घटरूपं न भाति" इति व्यवहारप्रयोजकस्य अभानापादकाज्ञानस्य च भङ्गः अस्ति । अत्र अज्ञानविषयता रूपावच्छिन्नचैतन्ये, अज्ञानविषयतावच्छेदकं रूपम् । तथा च रूपावच्छिन्नाज्ञानविषयत्वभङ्गःविशिष्टं चैतन्यं रूपावच्छिन्नचैतन्यमेव तदेव गुरुत्वावच्छिन्नचैतन्यम्, तद्विषयत्वं गुरुत्वे अस्तीत्यतः गुरुत्वस्य फलव्याप्यत्वापत्तिः । तस्मात् अज्ञानविषयतायां स्वावच्छिन्नत्वं निवेशनीयम् । इदानीं न दोषः गुरुत्वावच्छिन्नापरोक्षवृत्तेः असत्त्वेन गुरुत्वावच्छिन्नाज्ञानविषयत्वभङ्गःवैशिष्ट्यस्य चैतन्ये अभावात् ।

न च गुरुत्वस्य फलव्याप्यत्वम् इष्टम् इत्यतः तन्निवेशः नावश्यकः इति वाच्यम् फलव्याप्यत्वस्य नियमेन अपरोक्षत्वव्यवहारप्रयोजकत्वेन गुरुत्वेऽपि "गुरुत्वम् मम अपरोक्षम्" इति अपरोक्षत्वव्यवहारः स्यात् । अतः तद्वारणाय स्वावच्छिन्नत्वनिवेशः अज्ञानविषयतायाम् अपेक्षित एव ।

एवञ्च सति स्वशब्देन शुक्तिरूप्यं स्वीकर्तुं न शक्यते शुक्तिरूप्यस्य अज्ञानजन्यत्वेन अज्ञानविषयतानवच्छेदकत्वात् । तथा च स्वशब्देन शुक्तिरूप्यस्य ग्रहणासम्भवात् शुक्तिरूप्ये साधनवैकल्यम् ।

ननु गुरुत्वस्य प्रातिभासिकरजतस्य च ईश्वरीयमायावृत्तिविषयत्वात् स्वाकारवृत्तिप्रतिबिम्बितचिद्विषयत्वं फलव्याप्यत्वम् इति पक्षे कथं भागासिद्धिः साधनवैकल्यञ्च । तथा हि सिद्धान्ते ईश्वरस्य सर्वज्ञत्वम् अङ्गीक्रियते । तच्च सर्वज्ञत्वं मायापरिणामरूपवृत्तिं स्वीकृत्य उपपादनीयम् अस्ति । तत्राऽपि अतीतसर्वपदार्थविषयकमायावृत्तिरूपं ज्ञानं स्मरणात्मकम् इत्यङ्गीक्रियते । अनागतसर्वपदार्थविषयकज्ञानं तु ईक्षणरूपमायावृत्युपाधिकेश्वरसाक्षिरूपं विज्ञानम् इत्यङ्गीक्रियते । विद्यमानसर्वविषयकज्ञानं तु प्रत्यक्षवृत्तिरूपम् इत्यङ्गीक्रियते । तदुक्तं विवरणे "ईश्वरस्य सर्वकर्तृत्वादेव विद्यमानसर्वविषयज्ञता" इति । उक्तं च तत्त्वदीपने "ईश्वरोपाधिः सत्त्वप्रधानमाया विद्यमानसर्वविषयाकारेण परिणमते, तस्मिञ्च परिणामे प्रतिबिम्बितं चैतन्यं सर्वं पश्यतीत्याध्यासिकसम्बन्धात्" इति । एवञ्च सति ईश्वरस्य सर्वज्ञत्वम् उपपादयितुं गुरुत्वस्य मायापरिणामरूपप्रत्यक्षात्मकवृत्तिविषयत्वं स्वीकर्तव्यम् अस्ति । तथा च स्वम् - गुरुत्वं, स्वाकारवृत्तिः - ईश्वरीयमायारूपवृत्तिः, तत्प्रतिबिम्बितं चैतन्यम् - मायोपहितं चैतन्यम्, तद्विषयत्वरूपं फलव्याप्यत्वम् गुरुत्वे अस्त्येव । तथा च कथं गुरुत्वे भागासिद्धिः ? एवमेव ईश्वरस्य सर्वज्ञत्वोपपादनाय शुक्तिरूप्यविषयकेश्वरीयमायावृत्तेः वा शुक्तिरूप्यविषयकजीवीयभ्रमविषयकमायावृत्तेः वा "जीवदृष्टं रजतं मिथ्या" इत्याकारकमायावृत्तेः वा अङ्गीकर्तव्यत्वेन, कथं शुक्तिरूप्ये साधनवैकल्यमपि ? । न च सर्वज्ञत्वोपपादनाय इश्वरीयमायावृत्तिविषयत्वस्य शुक्तिरूप्ये स्वीकारे ईश्वरस्य भ्रान्तत्वं स्यात् इति वाच्यम् बाधितस्य अबाधितत्वानवगाहि ज्ञानं भ्रमः इति वा बाधितस्य बाधितत्वानवगाहि ज्ञानं भ्रमः इति वा स्वीकर्तव्यम् ; अन्यथा 'नेदं रजतम्' इति बाधज्ञानस्याऽपि भ्रमत्वं स्यात् । एवमेव घटादेश्च सिद्धान्ते मिथ्यात्वेन बाधितत्वस्वीकारेण घटादिविषयकेश्वरीयमायावृत्तेः अपि भ्रमत्वं स्यात् । एवञ्च व्यावहारिकपदार्थविषयकमायावृत्तिमादाय ईश्वरस्य भ्रान्तत्वं वारयितुं पूर्वोक्तमेव भ्रमलक्षणं वाच्यं । तथा च सति प्रातिभासिकपदार्थविषयकेश्वरीयमायावृत्तिमादाय अपि ईश्वरस्य भ्रान्तत्वं न सम्भवति । तथा च शुक्तिरूप्ये साधनवैकल्यं कथम् ? न च वस्तुतः त्वया उक्तरीत्या फलव्याप्यत्वस्य निर्दुष्टत्वात् भागासिद्धिसाधनवैकल्ये न सम्भवत एव ; तथा च प्रातिभासिकविषयकेश्वरीयमायावृत्तिम् अननुसन्धाय आपाततः एव पूर्वपक्षिणा भागासिद्धिसाधनवैकल्ये

आपादिते इति वाच्यम् "फलव्याप्यत्वव्यतिरिक्तस्य सर्वस्याऽपि पक्षस्य क्षोदक्षमत्वात्" इति पङ्क्त्यनुसारेणा उक्तदोषद्वयं सिद्धान्तिना अपि अङ्गीकृतमेव इत्यतः दोषद्वयम् उपपादनीयमेव । तच्च मदुक्तरीत्या उपपादयितुं न शक्यते इति चेन्न (भग्नावरणचिद्विषयत्वं फलव्याप्यत्वम् इति पक्षे तु इयं शङ्का न क्रियते यतो हि तन्मतानुसारेण ईश्वरीयमायावृत्तिं स्वीकृत्यापि भागासिद्धिः सम्भवत्येव । अयमाशः आवरणनाशरूपः भङ्गः वृत्तिप्रयोज्यः भवति । ईश्वरचैतन्यस्य च सर्वदा अनावृतत्वेन वृत्तिप्रयोज्यः आवरणभङ्गः ईश्वरचैतन्यस्य नैव सम्भवति) फलव्याप्यत्वम् इत्यत्र फलपदेन प्रमात्मकं फलं विवक्षितम् । प्रमात्मकं फलञ्च अज्ञातविषयकवृत्तिप्रतिबिम्बितचैतन्यम् । तथा च ईश्वरीयमायावृत्तेः अज्ञातविषयकत्वाभावेन इश्वरीयमायावृत्त्यवच्छिन्नचैतन्यस्य न प्रमात्मकफलपदार्थत्वम् । तथा च गुरुत्वविषयकमायावृत्त्यवच्छिन्नचैतन्यस्य शुक्तिरूप्यविषयकमायावृत्तिप्रतिबिम्बितेश्वरचैतन्यस्य च फलत्वाभावेन तदुभयमादाय फलव्याप्यत्वम् गुरुत्वे शुक्तिरूप्ये च न सिद्ध्यतीति कृत्वा भागासिद्धिसाधनवैकल्ये सम्भवतः एव ।

न च घटनिष्ठं गुरुत्वादिकं न जीवेन सर्वदा ज्ञायते इति कृत्वा तत् कदाचित् अज्ञातमेव भवति । परन्तु तदानीमपि ईश्वरं गुरुत्वादिकं जानात्येव तस्य सर्वदा सर्वज्ञत्वात् । तस्मात् जीवेन अज्ञातं यत् गुरुत्वादिकं तद्विषयिणी या मायावृत्तिः तत्प्रतिबिम्बितं चैतन्यं प्रमात्मकं फलं भवति, तत्तादात्म्यञ्च गुरुत्वादौ अस्तीति कृत्वा फलव्याप्यत्वसद्भावः इति वाच्यम् येन हि पुरुषेण यदज्ञातं तद्विषयकवृत्तिः तत्पुरुषीयप्रमा इति वक्तव्यम् । तथा च इश्वरेण अज्ञातं यत् वस्तु तद्विषयकवृत्तिं स्वीकृत्यैव ईश्वरीयप्रमा वाच्या परन्तु ईश्वरेण अज्ञातं वस्तु किञ्चित् नास्तीति कृत्वा ईश्वरीयमायावृत्तिः न प्रमा ।

तस्मात् ईश्वरीमायावृत्तिमादाय अपि फलव्याप्यत्वं नित्यातीन्द्रिये गुरुत्वादौ न उपपादयितुं शक्यते इत्यतः नित्यातीन्द्रिये भागासिद्धिः शुक्तिरूप्ये च साधनवैकल्यं सम्भवत्येव ।

यदि च अज्ञातविषयकत्वम् अघटयित्वा स्वाकारवृत्तित्वेन वृत्तेः निवेशं कृत्वा ईश्वरीयवृत्तिसाधारणं स्वाकारवृत्तिप्रतिबिम्बितचैतन्यतादात्म्यरूपं फलव्याप्यत्वं यदि हेतुत्वेन विवक्ष्यते तदा तु भागासिद्धिः साधनवैकल्यञ्च न सम्भवति ।

ननु एवं सति "फलव्याप्यत्वव्यतिरिक्तस्य सर्वस्याऽपि पक्षस्य क्षोदक्षमत्वात्" इति ग्रन्थः असङ्गतः स्यात् सिद्धान्ते दोषद्वयस्य अङ्गीकारात् इति चेन्न स्वावच्छिन्नाज्ञानविषयत्वभङ्गविशिष्टचिद्विषयत्वं फलव्याप्यत्वम् इति पक्षे तु पूर्वोक्तरीत्या भागासिद्धिः साधनवैकल्यञ्च भवत्येव इति कृत्वा तदनुसारेण उक्तपङ्क्तिः सङ्गमनीया ।

5. उपसंहारः

तथा च सम्बन्धार्था वृत्तिः इति मते स्वाकारवृत्तिप्रतिबिम्बितचैतन्यतादात्म्यं फलव्याप्यत्वम् । आवरणाभिभवार्था वृत्तिः इति मते तु भग्नावरणकचित्तादात्म्यं फलव्याप्यत्वम् । उभयस्मिन्नपि मते सिद्धिकारैः उक्तरीत्या सिद्धसाधनम् अर्थान्तरञ्च भवत्येव इति कृत्वा अयं पक्षः सिद्धान्ते न अङ्गीकर्तुं शक्यते ।

6. ग्रन्थसूचिका

1. पुटसंख्या २३३, मधुसूदनसरस्वतीविरचिता अद्वैतसिद्धिः, विट्ठलेशीयव्याख्योपबृंहिता गौडब्रह्मानन्दीयव्याख्यासनाथीकृता अद्वैतसिद्धिः , परिमल पब्लिकेशन्स, दिल्ली, २०१४
2. पुटसंख्या २३९, मधुसूदनसरस्वतीविरचिता अद्वैतसिद्धिः, विट्ठलेशीयव्याख्योपबृंहिता गौडब्रह्मानन्दीयव्याख्यासनाथीकृता अद्वैतसिद्धिः , परिमल पब्लिकेशन्स, दिल्ली, २०१४
3. पुटसंख्या २३६, मधुसूदनसरस्वतीविरचिता अद्वैतसिद्धिः, विट्ठलेशीयव्याख्योपबृंहिता गौडब्रह्मानन्दीयव्याख्यासनाथीकृता अद्वैतसिद्धिः , परिमल पब्लिकेशन्स, दिल्ली, २०१४